**International Journal of Academic Research and Development**
**ISSN: 2455-4197**
**Impact Factor: RJIF 5.22**
**www.academicsjournal.com**
**Volume 2; Issue 5; September 2017; Page No. 1039-1040**

# सर्गस्य मूलवृक्षस्तदीयो नियन्ता च

**मुकुल देवः**
शोधच्छात्र, श्री ला. ब. शा. रा. सं. वि., नई दिल्ली, भारत।

**प्रस्तावना**

इयं सृष्टिः कदोत्पन्ना कुतः कथं च जातेति[1] प्रश्नः पुरातनः? अस्योत्तरं बहुभिर्विविधं प्रदत्तं परं, वैदिकवाङ्मयेऽस्य यदुत्तरं प्रदीयते तत् सर्वथा सर्वाण्यतिशेते उत्तराणि। ऋग्वेदीयं नासदीयं सूक्तम्[1] अस्मिन् विषये सर्वेषां दार्शनिक-विचाराणां मूलभूतं केन्द्रमस्ति। न केवलमिदमेव सूक्तं प्रत्युत वेदेषु बहुत्रैतद्विषयकं मौलिकं मनोज्ञं च विवेचनं प्राप्नोति। इह वयं केवलं वाजसनेयिमाध्यन्दिनसंहितायाः (शुक्लयजुर्वेदः) सप्तदशाध्यायस्य कतिपयमन्त्राणां माध्येमेनेमं विषयं विवृण्मः। अत्र खल्वयं विषयो मानवमस्तिष्कस्य पराङ्कोटिकचिन्तनस्य परमां प्रतिष्ठामातिष्ठते। अस्याः किल माध्यन्दिनवाजसनेयिसंहितायाः सप्तदशतमाध्यायस्याष्टादशतमे मन्त्रे प्रश्नत्रयत्वेन निगदितमस्ति ''य इमा विश्वा भुवनानि जुह्वद् ऋषिर्होता न्यसीदत् पिता नः। स आशिषा द्रविण-मिच्छमानः प्रथमच्छदवराँ आविवेश।।[2] अर्थादत्र प्रथममिदमप्रच्छदृषिः- विश्वकर्मा भौवनो यदा जगत्सिसृक्षुरभवत् तदा सृष्टेः प्रागवस्थायां तस्यावस्थित्यै किमासीदधिकरणमिति[3]? द्वितीयोऽयं प्रश्नः- तदानी तदर्थमुपादानरूपं किंस्विद् द्रव्यमासीद् येनासौ स्रष्टेमां सृष्टिं ससर्जेति[4]। तृतीये प्रश्ने पप्रच्छर्षिः- कास्विदासीत् क्रिया यया विधिः पृथिव्यादिनानालोकलोकान्तररूपं ब्रह्माण्डमुत्पादयामासेति।[5] इमे त्रयः प्रश्नाः स्वाभाविकाः मौलिकाश्च सन्तीति नैवात्र सन्देहलेशः। अस्मादेषामुत्तराणि नैवोपेक्षणीयानि। अपरञ्च सति कर्त्तरि तस्य स्थानक्रियाकलापादिविषये नैसर्गिकतया प्रश्ना उपतिष्ठन्त्येवेति। तत्राद्यन्तावदुत्तरं दिशन्नब्रवीदृषिः- ''विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतोबाहुरुत विश्वतस्पात्।''[6] अस्यायं भावः- पृथिव्यादिलोकलोकान्तराणामुत्पादयित्री शक्तिः परमेश्वर-सर्वद्रक्-सर्वज्ञ-वेदोपदेष्टा-सर्वशक्तिमान्-सर्वव्यापकादिविविधविशेषणविशिट-ऽस्ति। एषैव नानासंख्याकानाञ्जीवानां धर्माधर्मानुरूपं स्वकीयेनेक्षणेन[7] विशिष्टेन यत्नेन च सत्त्वरजस्तमसां साम्यावस्थारूपिण्याः प्रकृत्याः[8] परमाणुभिर्सृष्टिं विरचयति।[9] अत्र ह्याद्यस्य प्रश्नस्योत्तरनिहितमस्ति यतो हि या शक्तिः सर्वशक्तिमती सती सर्वज्ञा सर्वं व्याप्नोति तदर्थमितरदधिकरणं नैवापेक्ष्यते, तस्य मूर्त्तरूपस्य परिच्छिनद्रव्यस्य कृत आवश्यकत्वादिति। व्यापकस्तु निजव्याप्यस्यान्तर्बाह्यं सर्वात्मनौतप्रोतश्च भवति। सा हि सनातनी शक्तिस्सर्वाधाररूपिण्यस्ति तस्या नास्त्यधिकरणमितरस्याधेयत्वादिति।

इदानीं द्वितीयस्य प्रश्नस्योत्तर प्रायच्छदृषिः- असौ परमेष्ठी विधाता सत्त्वरजस्तमसां साम्यावस्थारूपप्रकृत्याः परमाणुसंघातरूपद्रव्येणेमां विविधाबिभृतां सृष्टिं ससर्ज।[10] अस्यायमाशयः-असौ सृष्टिकृत्परमः पुरुषः सृष्टिनिर्माणकार्यं कारण- रूपप्रकृत्याः परमाणुसमवायमात्मेक्षणेन विक्षुब्धं विधाय तमेवोपादनीकृत्य विशिष्टेन यत्नेन सर्गस्य सर्जनमारभते।[11] एतेनासौ सृष्टेस्स्रष्टा निमित्तरूपसमवायिकारणं प्रकृतिश्चोपादानरूप-मसमवायिकारणमिति सुव्यक्तं भवति।

सम्प्रति तृतीयः प्रश्नोऽवशिष्यते सृष्टिनिर्माणे क्रिया कास्विदासीदिति? अत्रोच्यते-सामान्यतः सर्वगतत्वादसौ विधिः क्रियाशून्यत्वादकर्त्तत्युच्यते वेदान्तिभिः।[12] परं सांख्यैः 'स हि सर्ववित्सर्वकर्ता'[13] इति सूत्रं व्याहृत्य तदीयं कर्तृत्वं स्पष्टतया प्रतिपादितम्। तदनुरोधेनासौ विधिराद्यन्तावद् 'ईक्षणम्' रूपां क्रियां करोति तदनु प्रकृत्याः विक्षुब्धपरमाणूनादाय विविधं चराचरञ्जगच्चर्कर्त्ति। अत्रेदमवधेयम्- ब्रह्मणि जगतस्सिसृक्षायां सत्यामेव प्रकृत्युपादानेन जगद्रचनमारभ्यते।[14] एतेनेदं सुव्यक्तं परमात्मनि जगद्रचनायाः प्रयत्नमीक्षणं च निसर्गतया स्तो याभ्यामिदं जगदुत्पाद्यते।[15] परमात्मन एषा 'स्वाभाविकी-क्रियाशक्तिः'[16] क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकत्व- रूपसाधारणव्यापाररूपिणी नास्ति,[17] सा हि काचिद् विशिष्टैव शिष्टैरास्थीयते यस्याश्चानुमितिर् 'तदेजति तन्नैजति'[18] इत्येवं श्रूयते। यद्यप्येतया परमात्मा निमित्ततयैव केवलं व्यवहरति न त्वभिन्ननिमित्तोपादान तथैवेति विभावनीयम्। तथापि ह्यस्याः क्रियायाः निमित्तत्वेन जगत् सदैव क्रियावत्तिष्ठति 'जगद्' इति स्वामभिख्यामपि सार्थक्यमुपनयति।[19]

इत्थन्तु परमात्मनो विशिष्टेनेक्षणेन प्रयत्नेन च प्रकृतेस्सत्त्वरजस्तमसां साम्यवस्थायाः विभङ्गो भवतीति तथ्यं, तथापि जगत्यां दृश्यमानं वैचित्र्यं वैविध्यञ्च नैवैनमवलम्बते, तत्त्वनन्तजीवानामनन्तात्यन्तभिन्नातिभिन्नकर्मायत्तम्।[20] अत एव 'भोगापवर्गार्थं दृश्यम्'[21] इत्युच्यते मनीषिभिः। तदेवमुक्तस्य प्रश्नस्योत्तरस्यायमेव सारः- ''विश्वतश्चक्षु विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्। स बाहुभ्यां धमति संपतत्रैर्द्यावा भूमी जनयन्देव एकः।''[22]

एतमेवातिगहनविषयं भूयोऽपि विवरीतुकाम ऋषिः पुनरप्यपृच्छत् ''किंस्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः। मनीषिणो मनसा पृच्छतेदुत्पद्यदध्यतिष्ठद् भुवनानि धारयन्।।''[23] अस्मिन्मन्त्रे यं प्रश्नमपृच्छदृषिस्त- स्योत्तरमस्यान्त्यचरणेऽदायि- ''मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठद् भुवनानि धारयन्''[24] इति। अस्यायं भावः- समुत्पन्नान्यखिलानि भुवनानि धारयन् विधाता यं द्रव्यमधितिष्ठति

तत्कारणभूतद्रव्यमेव प्रकृतित्वेन 'वृक्षः', तेनैतेनैव व्यातेने विविधं जगद्वितानं विधिः। ऋग्वेदस्तु सुस्पष्टमेव प्रकृतिं वृक्षत्वेनोपमिमीते। तथा हि- ''द्वा सुपर्णा सयुजा सखायः समानं वृक्षं परिषस्वजाते।''[25] मुण्डकोपनिषद्यपि 'समाने वृक्षे पुरुषो निमग्नो'[26] इति वाक्येनाऽपि प्रकृतेः वृक्षत्वं समार्तिथदृषिः। अत्र प्रकृतेर्वृक्षत्वेन वचनीयतायाः प्रधानं कारणं वृक्षस्याङ्गोपाङ्गेभ्यो जायमानानि विविधानि कार्याण्येव सन्ति। जागतिकमखिलं कार्यजातं प्रकृतिजमेवेति। प्रकृतिरेव परमेष्ठिनियन्त्रिता जीवानां भोगापवर्गादिरुपाणि विविधानि फलानि समुत्पादयति। वृक्षो यथा बीजरूपेणात्मधारणानुकूलव्यापाररूपिण्यात्मसत्तां सदेवावधारयति तथैव प्रकृतिरपि परिणमन्ती सत्यपि निजकृतकार्यैस्स्वां सततमभिव्यञ्जयति। अत्रैव 'बीजाङ्कुरन्यायः' सार्थक्यमेति।

अयमेव वृक्षो यजुषि 'अश्वत्थ'[27] नाम्नाऽभिहितोऽस्ति। तत्रायमश्वत्थः क्षणप्रध्वन्सित्वेन प्रतिपादितः कठोपनिषदि[28] गीतायाञ्चापि[29] बहुपल्लवनं विलोक्यतेऽश्वत्थस्य। एतत्सर्वं हि वेदमूलकमेवास्ति।

तदेवमिदं निष्कृष्टं भवति प्रकृतिरेव वेदे वृक्षः। तस्या इदं नाम युक्तिसङ्गतं भावपूर्णञ्चेति। जीवात्मपरमात्मरूपसुपर्णद्वयमेकस्यैव प्रकृतिरूपवृक्षस्यैवोपरि समासीनम्। अनयोरेकस्तत्फलमश्नात्यथो अपरोऽभिचाकशीतीतरम्। जीवो हि प्रकृत्याऽऽत्मकृतकृत्फलमश्नाति परं तदीयस्सनातनस्सखा परमात्मा तस्य तत्प्राशनमनश्नन्नेव विलोकयति साक्षिभूतः।[30] अत्र महर्षिदयानन्दस्यापि[31] मतं विलोकनीयमाद्यशङ्कराचार्यस्यापि।[32] एतयोर्दयानन्द एव सत्यमुपतिष्ठति शङ्करस्तु दुराग्रहग्रहिलोऽप्रामाणिकश्चेति।

## संदर्भ


1. को अद्धा वेद क इह प्र वोचत् कुत आजाता कुत इयं विसृष्टिः। अर्वाग् देवा अस्य विसर्जनेनाथ को वेद यत आबभूव।। ऋग्वेद सं. 10/129/6
2. ऋग्वेद सं. 10/129
3. शुक्लयजुर्वेद संहिता 26/27
4. द्र॰ तत्रैव
5. किंस्विदासीदधिष्ठानमारम्भणं कतमस्वित्कथासीत्। तत्रैव 17/18
6. कतमस्वित्कथासीत्.। तत्रैव।
7. तत्रैव- 17/19
8. द्र॰- वैदिकज्योतिः, पृष्ठ 200-203 ले. आचार्य वैद्यनाथः शास्त्री
9. सत्त्वरजस्तमसां साम्यावस्थाप्रकृतिः ....।। सांख्यदर्शनम्- 1/26
10. आत्मकृतेः परिणामात्।। सांख्यदर्शनम 14/26
11. द्र॰ तत्रैव, पृष्ठ 201
12. द्र॰ तत्रैव पृष्ठ 201-203
13. द्र॰ सदानन्दकृतो वेदान्तसारनामा प्रकरणग्रन्थः।
14. सांख्यदर्शनम् 3/56
15. कामस्तदग्रे समवर्तताधिमनसो रेतः प्रथमं यदासीत्। ऋक्॰ सं. 10/129/4
16. द्र॰ 'वैदिकज्योतिः पृष्ठ 201 ले. वैद्यनाथः शास्त्री
17. न तस्य कार्यं करणं च विद्यते, न तत्समश्चाभ्यधिकश्च दृश्यते। परास्य शक्तिर्विविधैव विद्यते, स्वाभाविकी ज्ञान-बल-क्रिया च। श्वेताश्वतर॰ 6/8
18. द्र॰ वैयाकरणभूषणसारः धात्वर्थनिरूपणम्, ले.पं. कौण्डभट्टः
19. शुक्लयजुर्वेद संहिता 40/51
20. द्र॰ वैदिकज्योति, पृष्ठ 201
21. द्र॰ तत्रैव
22. प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम्। योगदर्शनम् 2/18
23. शुक्लयजुर्वेद संहिता- 17-19
24. द्र॰ तत्रैव 17-20
25. द्र॰ तत्रैव 17/20 तममन्त्रस्यान्त्यचरणम्
26. द्र॰ ऋग्वेदः 1/164/20
27. मुण्डकोपनिषद् 3/1/2
28. अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता। गोभाज इत् किलासथ यत्सनवथ पूरूषम्।। यजुर्वेदः 35/4
29. द्र॰ कठोपनिषदस्तृतीया वल्ली
30. द्र॰ श्रीमद्भगवद्गीता अ. 15/1,2,3
31. द्र॰ ऋग्वेदसंहिता 1/164/20,21,22
32. तत्रैव श्रीमद्दयानन्दर्षिभाष्यम्।
33. द्र॰ कठोपनिषदः तृतीया वल्ली-शाङ्करभाष्यम्।